## रूपादाहतप्रशंसयोर्यप्। (१२०/१०२७)

आहतप्रशंसे प्रकृत्युपाधी। आहतप्रशंसा[1]विशिष्टार्थे वर्तमानाद् रूपशब्दात् यप् प्रत्ययो भवति मत्वर्थे। आहतं रूपमस्य रूप्यो दीनारः। रूप्यः [2]केदारः। रूप्यं कार्षापणम्। [3]प्रशस्तं रूपम् अस्यास्ति रूप्यः [4]पुरुषः। [5]निघातिकाताडनादिना दीनारादिषु रूपं यदुत्पद्यते तदाहतमित्युच्यते। आहतप्रशंसयोः इति किम्? रूपवान्।

[५८५] यप्प्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम्। (म. भा. २.३९९)
[6]हिम्याः पर्वताः। [7]गुण्याः ब्राह्मणाः॥

## अस्मायामेधास्रजो विनिः (१२१/१०२८)

असन्तात् प्रातिपदिकात्, माया मेधा स्रज् इत्येतेभ्यश्च विनिः प्रत्ययो भवति मत्वर्थे। मतुप् सर्वत्र समुच्चीयते एव। असन्तात् तावत् – यशस्वी, तपस्वी, पयस्वी। मायावी। मेधावी[8]। स्रग्वी। मायाशब्दाद् व्रीह्यादिषु पाठात् इनिठनौ अपि भवतः। मायी, मायिकः॥

## बहुलं छन्दसि। (१२२/३४०८)

छन्दसि विषये बहुलं विनिः प्रत्ययो भवति मत्वर्थे। '[9]अग्ने तेजस्विन्' (तै. सं. ३.३.११)। न[10] भवति। सूर्यो वर्चस्वान्।

[५८६] [11]छन्दसि विनिप्रकरणे[12]ऽष्ट्रामेखलाद्वयोभयरुजा[13]हृदयानां दीर्घत्वं चेति वक्तव्यम्। (म. भा. २.३९९)

'[14]अष्ट्रावी' (१०.१०२.८)। 'मेखलावी' (अ. प्रा. ३.४.१)। 'द्वयावी' (अ. प्रा. ३.४.१) 'उभयावी' (ऋ. ५.७.१०)। रुजावी। हृदयावी। द्वयोभयहृदयानि दीर्घत्वं प्रयोजयन्ति।

[५८७] [15]मर्मणश्चेति वक्तव्यम्। (म. भा. २.३९९)
मर्मावी।

[५८८] सर्वत्रामयस्योपसङ्ख्यानम्। (म. भा. २.३९९)
छन्दसि भाषायां च। आमयावी (तै. सं. ३.२.३)।

[५८९] शृङ्गवृन्दाभ्यामारकन् [16]वक्तव्यः।
शृङ्गारकः। वृन्दारकः (श. ब्रा. १४.६.११.१)।

[५९०] फलबर्हिभ्यामिनच् वक्तव्यः। (म. भा. २.३९९)
फलिनः। बर्हिणः।

---

1. विशिष्टेऽर्थे फ. ह. 2. केदारः नास्ति फ. 3. प्रशंसायाम् इत्यधिकम् फ. 4. गौः ब. ड. फ, पशुः ह. 5. निघातनात् ताडनात् ड. 6. उदाहरणमिदं नास्ति क. 7. गुण्यः ब्राह्मणः ड, गुण्याः मुनयः फ, पुण्याः क. 8. मायावान् मेधावान् इत्यधिकम् ड, भवन्ति मायाविषु ये न मायिनः इत्यधिकम् ग. 9. अग्निस्तेजस्वी फ. 10. च इत्यधिकम् क. 11. छन्दोविन्प्रकरणे क. 12. ऊर्ण क. 13. हृदयंगमानां ड. 14. ऊर्णावी क, ऊष्ट्रावी ग. 15. कर्मणश्च क. ह, कर्णावी ह, चर्मणश्च चर्मावी ड, शर्मणः ग. 16. प्रत्ययो भवति ड. ग, भवति फ.